# PRASNOPANISHAD



## CHAPTER 4

*11 Verses*

## Chapter 4 - Verse 1

अथ हैनं सौर्यायणि गार्ग्यः पप्रच्छ ।
भगवन्नेतस्मिन् पुरुषे कानि स्वपन्ति
कान्यस्मिञ्जाग्रति कतर एष देवः
स्वप्नान् पश्यति कस्यैतत् सुखं भवति कस्मिन्नु
सर्वे सम्प्रतिष्टिता भवन्तीति ॥ १॥

**Atha hainam sauryaayani gaargyah papracha,**
**bhagavan estamind purushe kaani svapanti?**
**kaanyasmin jaagrati? katara esha devah**
**svapnaan pasyati? kasya-etat sukham bhavati? kasminnu**
**save sampratishthitaa bhavanti iti II 1 II**

# Chapter 4 - Verse 2

तस्मै स होवच । यथ गार्ग्य मरीचयोऽर्कस्यास्तं गच्छत:
सर्वा एतस्मिंस्तेजोमण्डल एकीभवन्ति । ता: पुन: पुनरुदयत:
प्रचरन्त्येवं ह वै तत् सर्वं परे देवे मनस्येकीभवति
तेन तर्ह्येष पुरुषो न श्रृणोति न पश्यति
न जिघ्रति न रसयते न स्पृशते नाभिवदते
नादत्ते नानन्दयते न विसृजते नेयायते स्वपितीत्याचक्षते ॥ २॥

Tasmai sa hovaacha. "yathaa gaargya mareechayo arkasya-astam gachchhatah
sarvaa etasmin-tejomandale ekeebhavanti ; taah punah punarudayatah
pracharanti, evam ha vai tatsarvam pare deve manasi ekeebhavati
tena tarhy-esha purusho, na srnoti, na pasyati,
na jighrati, na rasayate, na sprisyati, na-abhivadate
na-adatte, na-anandayate, na visrjate, neyaayate, svapiteeya-achakshate II 2 II

# Chapter 4 - Verse 3

प्राणाग्नय एवैतस्मिन् पुरे जाग्रति ।
गार्हपत्यो ह वा एषोऽपानो व्यानोऽन्वाहार्यपचनो
यद्गार्हपत्यात् प्रणीयते प्रणयनादाहवनीयः प्राणः ॥ ३॥

**Praana-agnaya eva-itasmin-pure jaagrati**

**gaarhapatyo ha vaa esho-apaanah vyaano-anvaahaarya pachanah**

**yat gaarhapatyaat praneeyate ; pranayanaada-avahaneeyah praanah II 3 II**

## Chapter 4 - Verse 4

यदुच्छ्वासनिःश्वासावेतावाहुती समं नयतीति स समानः ।
मनो ह वाव यजमानः । इष्टफलमेवोदानः ।
स एनं यजमानमहरहर्ब्रह्म गमयति ॥ ४॥

Yad-uchchhvaasa nihsvaasaav-etau aahuti samam nayateeti sa samaanah.
mano ha vaava yajamaana, ishtaphalameva udaanah
sa enam yajamaanam-aharahar brahma gamayati II 4 II

# Chapter 4 - Verse 5

अत्रैष देवः स्वप्ने महिमानमनुभवति ।
यद्दृष्टं दृष्टमनुपश्यति
श्रुतं श्रुतमेवार्थमनुश्रृणोति
देशदिगन्तरैश्च प्रत्यनुभूतं
पुनः पुनः प्रत्यनुभवति
दृष्टं चादृष्टं च श्रुतं चाश्रुतं
चानुभूतं चाननुभूतं च
सच्चासच्च सर्वं पश्यति सर्वः पस्यति ॥ ५॥

atraisha devah svapne mahimaanam-anubhavati.
yad-drshtam drshtam-anupasyati
srutam srutam-eva-artham anusrnoti.
desa digantaraischa pratyanubhootam
punah punah : pratyanubhavati.
drashtam cha-adrshtam cha, srutam cha-asrutam
cha anubhootam cha-ananubhootam cha
satcha-asatcha sarvam pasyati sarvah pasyati II 5 II

**Chapter 4 - Verse 6**

स यदा तेजसाऽभिभूतो भवति ।

अत्रैष देवः स्वप्नान्न पश्यति

अथ यदैतस्मिञ्शरीर एतत्सुखं भवति ॥ ६॥

Sa yadaa tejasaabhibhooto bhavati

atraisha devah svapnaan na pasyati

Atha tadaitasmin sareere etat sukham bhavati II 6 II

# Chapter 4 - Verse 7

स यथा सोम्य वयांसि वसोवृक्षं सम्प्रतिष्ठन्ते ।
एवं ह वै तत् सर्वं पर आत्मनि सम्प्रतिष्ठते ॥ ७॥

Sa yathaa somya, vayaamsi vaaso vriksham sampratishthante
evam ha vai tat sarvam para atmani sampratishthate II 7 II

# Chapter 4 - Verse 8

पृथिवी च पृथिवीमात्रा चापश्चापोमात्रा च तेजश्च
तेजोमात्रा च वायुश्च वायुमात्रा चाकाशश्चाकाशमात्रा
च चक्षुश्च द्रष्टव्यं च श्रोत्रं च श्रोतव्यं च घ्राणं च
घ्रातव्यं च रसश्च रसयितव्यं च त्वक्च स्पर्शयितव्यं च
वाक्च वक्तव्यं च हस्तौ चादातव्यं चोपस्थश्चानन्दयितव्यं
च पायुश्च विसर्जयितव्यं च यादौ च गन्तव्यं च मनश्च
मन्तव्यं च बुद्धिश्च बोद्धव्यं चाहङ्कारश्चाहङ्कर्तव्यं च
चित्तं च चेतयितव्यं च तेजश्च विद्योतयितव्यं च प्राणश्च
विद्यारयितव्यं च ॥ ८॥

Prithivee cha prithivee maatraa cha apascha-apomaatraa cha tejascha
tejo maatra cha vaayuscha vaayu matraa cha aakaasa-schaakaasa maatraa
cha chakshucha drashtavyam cha srotavyam cha ghraanam cha
ghraatavyam cha rasam cha rasayitavyam cha tvak cha sparsayitavyam cha
vaak cha vaktavyam cha hastau chaadaatavyam cha upasthascha aanandayitavyam
cha paayusch visarjayitavyam cha paadau cha gantavya cha manascha
mantavyam cha buddhischa boddhavyam cha ahankaarascha-ahamkartavyam cha
chittam cha chetayitavyam cha tejascha vidyotayitavyam cha
praanascha vidhaarayitavyam cha II 8 II

# Chapter 4 - Verse 9

एष हि द्रष्ट स्प्रष्टा श्रोता घ्राता रसयिता मन्ता
बोद्धा कर्ता विज्ञानात्मा पुरुषः ।
स परेऽक्षर आत्मनि सम्प्रतिष्ठते ॥ ९॥

Esha hi drashtaa sprashtaa srotaa ghraataa rasayitaa mantaa
boddhaa kartaa vijnaanaatmaa purushah
sa pare-akshare aatmani sampratishthate II 9 II

# Chapter 4 - Verse 10

परमेवाक्षरं प्रतिपद्यते स यो ह वै
तदच्छायमशरीरम्लोहितं शुभ्रमक्षरं वेदयते यस्तु सोम्य ।
स सर्वज्ञः सर्वो भवति । तदेष श्लोकः ॥ १०॥

Param-eva-aksharam pratipadyate sa yo ha vai
tad-achchhaayam-asareeram-alohitam subhramaksharam vadayate
yastu somya, sa sarvajnah sarvo bhavati ; todesha slokah II 10 II

## Chapter 4 - Verse 11

विज्ञानात्मा सह देवैश्च सर्वैः प्राणा भुतानि सम्प्रतिष्ठन्ति यत्र

तदक्षरं वेदयते यस्तु सोम्य स सर्वज्ञः सर्वमेवाविवेशेति ॥ ११॥

Vijnaanaatmaa saha devaischa sarvaih, praano bhootaani sampratishthati yatra,

tadksharam vedayate yastu somya, sa sarvajnah, sarvameva-avivesa iti II 11 II

# PRASNOPANISHAD



## CHAPTER 5

*7 Verses*

## Chapter 5 - Verse 1

अथ हैनं सैब्यः सत्यकामः पप्रच्छ ।
स यो ह वै तद्भगवन्मनुष्येषु प्रायणान्तमोङ्कारमभिध्यायीत ।
कतमं वाव स तेन लोकं जयतीति ॥ १॥

Atha hainam saibyah satyakaamah papraccha
so yo ha vai tadbhagavan, manushyeshu prayaanaatam-omkaaram abhidhyaayeeta
katamam vaava sa tena lokam jayati, iti II 1 II

## Chapter 5 - Verse 2

तस्मै स होवाच ।

एतद्वै सत्यकाम परं चापरं च ब्रह्म यदोङ्कारः ।

तस्माद्विद्वानेतेनैवायतनेनैकतरमन्वेति ॥ २॥

Tasmai sa hovaacha

Etadvai satyakaama, param cha aparam cha brahma yad-omkaarah

tasmaad vidvaan etena-eva-ayatanenaikataram-anveti II 2 II

# Chapter 5 - Verse 3

स यध्येकमात्रमभिध्यायीत स तेनैव
संवेदितस्तूर्णमेव जगत्याभिसम्पध्यते ।
तमृचो मनुष्यलोकमुपनयन्ते स तत्र तपसा
ब्रह्मचर्येण श्रद्धया सम्पन्नो महिमानमनुभवति ॥ ३॥

sa yady-ekamaatram-adhidhyaayeeta satenaiva
samvedia-stoornameva jagatyaam-abhisampadyate
tamrcho manushya-lokam-upanayante sa tatra tapasaa
brahmacharyena sraddhayaa sampanno mahimaanam-anubhavati II 3 II

## Chapter 5 - Verse 4

अथ यदि द्विमात्रेण मनसि सम्पध्यते
सोऽन्तरिक्षं यजुर्भिरुन्नीयते सोमलोकम् ।
स सोमलोके विभुतिमनुभूय पुनरावर्तते ॥ ४॥

Atha yadi dvimaatrena manasi sampadyate
sa antariksham yajurbhir-unneeyate somalokam
sa somaloke vibhootim-anubhooya punaraavartate II 4 II

**Chapter 5 - Verse 5**

यः पुनरेतं त्रिमात्रेणोमित्येतेनैवाक्षरेण परं
पुरुषमभि- ध्यायीत स तेजसि सूर्ये सम्पन्नः ।
यथा पादोदरस्त्वचा विनिर्भुच्यत एवं ह वै स पाप्मना विनिर्भुक्तः
स सामभिरुन्नीयते ब्रह्मलोकं स एतस्माज्जीवघनात् परात्परं
पुरुशयं पुरुषमीक्षते । तदेतौ श्लोकौ भवतः ॥ ५॥

Yah punaretam trimaatrena-om-ityetenaivaaksharena param
purusham-abhidhyaayeeta, sa tejasi soorye sampannah
yathaa paadodara-stvachaa vinirmuchayate evam ha vai sa paapmanaa vinirmuktah
sa saamaabhir-unneeyate brahmalokam sa etasmaajjiivaghanaath paratparam
purisayam purusham-eekshate tad etau slokau bhavatach II 5 II

## Chapter 5 - Verse 6

तिस्रो मात्रा मृअत्युमत्यः प्रयुक्ता अन्योन्यसक्ताः अनविप्रयुक्ताः ।

क्रियासु बाह्याभ्यन्तरमध्यमासु सम्यक् प्रयुक्तासु न कम्पते ज्ञः ॥ ६॥

Tistro maatraa mrityumatyah prayuktta annyonnya-saktaa anaviprayuktah

kriyaasu baahya-abhyantara-madhyamaasu samyak-prayuktaasu na kampate jnah II 6 II

## Chapter 5 - Verse 7

ऋग्भिरेतं यजुर्भिरन्तरिक्षं सामभिर्यत् तत् कवयो वेदयन्ते ।
तमोङ्कारेणैवायतनेनान्वेति विद्वान्
यत्तच्छान्तमजरममृतमभयं परं चेति ॥ ७॥

Rgbhir-etam yajurbhir-antariksham sa saamabhir-yattal-kavayo vedayante
tam-omkaarenenaiva-ayatanena-anveti vid'vaan,
vattachchantam-ajaram-amritam-abhayam param cheti II 7 II

# PRASNOPANISHAD



# CHAPTER 6

***8 Verses***

## Chapter 6 - Verse 1

अथ हैनं सुकेशा भारद्वाजः पप्रच्छ । भगवन् हिरण्यनाभः
कौसल्यो राजपुत्रो मामुपेत्यैतं प्रश्नमपृच्छत ।
षोडशकलं भारद्वाज पुरुषं वेत्थ । तमहं कुमारम्ब्रुवं नाहमिमं वेद ।
यध्यहमिमवेदिषं कथं ते नावक्ष्यमिति । समूलो वा एष परिशुष्यति
योऽनृतमभिवदति तस्मान्नार्हम्यनृतं वक्तुम् । स तूष्णीं
रथमारुह्य प्रवव्राज । तं त्वा पृच्छामि क्वासौ पुरुष इति ॥ १॥

Atha hainam sukesaa bhaaradwaajah papraccha, bragavan, hiranya-naabhah

kausalyo rajaputro maam-upetyaitam prasnam-aprcchata

shodasakalam, bharadwaaja, purusham, vettha? tam-aham kumaaram-abruvam na-aham-imam veda

yady-aham-imam-avedisham katham te na avakshyam iti sa moolo vaa esha parishushyati

yo-anrtam-abhivadati tasmaann-aahaamya-nrtam vaktum. sa tooshneem

ratham-aaruhya pravavraaja tam tvua pricchami, kvaasau purusha? iti II 1 II

## Chapter 6 - Verse 2

तस्मै स होवाच । इहईवान्तःशरीरे सोम्य स पुरुषो यस्मिन्नताः षोडशकलाः प्रभवन्तीति ॥ २॥

Tasmai sa hovaacha, iha-iva-antah-sareere, somya, sa purusho, yasmin-netaah shodasakalaah prabhavanti iti II 2 II

## Chapter 6 - Verse 3

स ईक्षाचक्रे । कस्मिन्नहमुत्क्रान्त उत्क्रान्तो भविष्यामि कस्मिन्वा प्रतिष्टिते प्रतिष्टस्यामीति ॥ ३॥

Sa eekshaamchakre, kasmin naha utkraanta? utkraanto bhavishyaami? kasmin vaa pratishthate? pratishthaayaam? iti II 3 II

**Chapter 6 - Verse 4**

स प्राणमसृजत प्राणाच्छ्रद्धां
खं वायुर्ज्योतिरापः पृथिवीन्द्रियं ।
मनः अन्नमन्नाद्वीर्यं तपो मन्त्राः
कर्म लोका लोकेषु च नाम च ॥ ४॥

Sa praanam-asrijata, praanaat-sraddhaam
kham vaayur-jyotir-aapah prithiveendriyam
mano-annam annaadveeryam, tapo mantraah
karmalokalokeshu cha naama cha II 4 II

## Chapter 6 - Verse 5

स यथेमा नद्यः स्यन्दमानाः समुद्रायणाः समुद्रं प्राप्यास्तं
गच्छन्ति भिद्येते तासां नामरुपे समुद्र इत्येवं प्रोच्यते ।
एवमेवास्य परिद्रष्टुरिमाः षोडशकलाः पुरुषायणाः पुरुषं
प्राप्यास्तं गच्छन्ति भिद्येते चासां नामरुपे पुरुष इत्येवं
प्रोच्यते स एषोऽकलोऽमृतो भवति तदेष श्लोकः ॥ ५॥

Sa yathemaa nadyah syandamaanaah samudraayanaah samudram praapya-astam gachchanti, bhidyete taasaam naamaroope, samudra ityevam prochyate, evam-eva-asya paridrashtur-imaah, shodasa-kalaah, purusha-ayanaah purusham praapya-astam gachchhanti bhidyete taasaam naamaroope purusha ityevam prochyate, sa esho-akalo-amrito bhavati, tadesha slokah II 5 II

**Chapter 6 - Verse 6**

अरा इव रथनाभौ कला यस्मिन्प्रतिष्ठिताः ।
तं वेध्यं पुरुषं वेद यथ मा वो मृत्युः परिव्यथा इति ॥ ६॥

Araa iva rathanaabhau kalaa yasmin pratishthitaah

tam vedyam purusham veda yathaa maa vo mrityuh parivyathaa iti II 6 II

**Chapter 6 - Verse 7**

तान् होवाचैतावदेवाहमेतत् परं ब्रह्म वेद ।
नातः परमस्तीति ॥ ७॥

Taan hovaacha-e-taavad-eva-aham-etat param brahma veda

na-atah paramasti, iti II 7 II

# Chapter 6 - Verse 8

ते तमर्चयन्तस्त्वं हि नः पिता योऽस्माकमविद्यायाः

परं परं तारयसीति । नमः परमऋषिभ्यो नमः परमऋषिभ्यः ॥ ८॥

Te tam-archayantah tvam hi nah pitaa yo asmaakam avidyaayaah

param paaram taarayaseeti, namah parama-rishibhyo nama parama rishibhyah II 8 II